वाव सन्तं प्रियाप्रिये न स्पृशत इति"। तथा च देहसंबन्धाभावे कथं मरणसम्भवः। "न जायते म्रियते वा कथञ्चिदिति" गीतावाक्येन तस्य मरणनिषेधात्। "न तस्य प्राणा ह्युत्क्रामन्ति इहैव समवलीयन्ते" इति श्रुत्या तत्त्वज्ञानिनः प्राणोत्क्रमणरूपमरणनिषेधेन ज्ञानिनो न मृत्युरिति वेदान्तिसिद्धान्तः। अन्यमते तु एतद्देहात् प्राणोत्क्रान्तावपि न पुनर्देहसम्बन्धोत्तरं पुनर्मरणमिति तद्राहित्यमेव मोक्ष इति भेदः। अतएवोक्तं श्रुत्या "मृत्युमुखात् प्रमुच्यते" इति तेन पुनर्मृत्युकारणीभूतादृष्टक्षय एव ज्ञानेन जन्यते "ज्ञानाग्निः सर्वकर्म्माणीति" शास्त्रेण प्रारब्धकर्म्मातिरिक्तकर्म्मक्षयस्यैव ज्ञानेन साध्यतायाः सर्वसम्मतत्वात् विदुषश्च एतद्देहारम्भकादृष्टवत् एतद्देहविगमादृष्टस्यापि प्रारब्धफलकतया न तस्य नाश इति। अधिकमाकरे द्रष्टव्यम्।

**अतिमैथुन** न॰ अत्यन्तं स्वशक्तिमतिक्रम्य मैथुनं स्त्रीसङ्गमः। स्वशक्त्यतिक्रमेण स्त्रीसङ्गमे। "अतिमैथुनादमैथुनाद्वेति"

**अतिमोदा** स्त्री अतिशयितो मोदो गन्धः यस्याः ब॰। नवमल्लिकायाम्। अत्यन्तामोदवति त्रि॰।

**अतिरक्त** त्रि॰ अत्यन्तः रक्तः रक्तवर्णः अनुरागयुक्तो वा। अतिलोहितवर्णे, अत्यन्तानुरक्ते च। अत्यन्तरक्तवर्णे पु॰।

**अतिरथ** पु॰ अतिक्रान्तो रथं रथिनम् अत्या॰ स॰। "अमितान् योधयेद्यस्तु संप्रोक्तोऽतिरथस्तु सः" इत्युक्तलक्षणे योधविशेषे। "ये रथाः पृथिवीपाल! तथैवातिरथाश्च ये" इत्युपक्रम्य "कृतवर्म्मा ह्यतिरथ" इति "मद्रराजो महेष्वासः शल्यो मेऽतिरथो मत" इत्यादिना बहवोऽतिरथा भा॰ उद्यो॰ रथातिरथासंख्याने दर्शिताः। रथातिक्रमकारके त्रि॰। [ख्यातायां मूर्व्वालतायाम्।

**अतिरसा** स्त्री अतिशयितो रसो यस्याः ब॰। (रास्ना) इति

**अतिराज** त्रि॰ अतिक्रान्तो राजानम् टच् समा॰। अतिक्रान्तनृपे। स्त्रियां ङीप्। [निषेधात् न टच्। पूज्यनृपतौ।

**अतिराजन्** पु॰ अतिशयितः पूजितो राजा "न पूजनादिति

**अतिरात्र** पु॰ अतिशयिता रात्रिः ततः अस्त्यर्थे अच्। एकरात्रसाध्ये यागभेदे। स च गवामयने प्रथमसंस्थः यथोक्तं ताण्ड्यब्राह्मणे। "प्रजापतिर्वा इदमग्र आसीत् सोऽकामयत बहु स्यां प्रजायेयेति स एतमतिरात्रमपश्यत्तमाहरत्तेनाहोरात्रे प्राजनयदिति" गवाममयनसत्रमुपक्रम्य, "अथास्य सत्रस्य पूर्व्वोक्तान्यहानि क्रमेण विधास्यन् अतिरात्रसंस्थम् प्रथमं विधातुमाहेति" भाष्ये अवतरणिकां दत्त्वा व्याख्यातं यथा "स एवं कामयमानः प्रजापतिः बहुपायत्वेन एतं गवामयनस्याद्यमतिरात्रमपश्यदिति"। तच्च स्तुतिपूर्व्वकं विधित्सन्नाह। "यदेषोऽतिरात्रो स एवाहोरात्रे एव प्रजनयन्तीति" "एष प्रजापतिना दृष्टोऽतिरात्रः गवामयनस्य प्रथममहर्भवतीति यत् तेन सत्रानुतिष्ठन्तो यजमाना अहोरात्रे एव प्रजनयन्ति उत्पादयन्ति स्वाधीने कुर्व्वन्तीति" भाष्यम्। इत्युपक्रम्य चतुर्थाध्यायप्रथमखण्डपर्य्यन्ते तत्र विहितानि स्तोत्रशस्त्रादीन्युक्तानि। "अतिरात्रे षोड़शिनं गृह्णाति, नातिरात्रे षोड़शिनं गृह्णातीति" श्रुत्यन्तरम्। षोड़शी पात्रभेदः।

**अतिरि** न॰ अतिक्रान्तं रायं क्लीवत्वात् ह्रस्वः। धनातिक्रान्ते कुलादौ। तृतीयाद्यचि तु अतिरिणा अतिरिणे इत्येवमेकैकमेव रूपं, न पुंवद्भावः तस्य इगन्ताङ्गत्वाभावात्। पुंसि, स्त्रियाञ्च अतिराः अतिरायावित्यादि।

**अतिरिक्त** त्रि॰ अति+रिच्-क्त। अतिशयिते, श्रेष्ठे, भिन्ने, शून्ये च। भावे क्त। अतिशये, आधिक्ये च न॰। तत्र भेदे "अतिरिक्तमथापि यद्भवेदिति" भाषा॰ "न वृत्तवृत्ति व्यतिरिक्तेति" कुमा॰। यस्य यावत्प्रमाणं युक्तं ततोऽधिकत्वे "हीनाङ्गीमतिरिक्ताङ्गीमिति" स्मृतिः।

**अतिरुच्** पु॰ रोचते इति रुक् स्त्रीणामूरुदेशः अतिक्रान्तो रुचम् अत्या॰ स॰। जानुदेशे। अतिक्रान्तकान्तिके त्रि॰। प्रा॰ स॰। अतिशयितकान्तौ स्त्री।

**अतिरूक्ष** त्रि॰ अतिशयितः रूक्षः प्रा॰ स॰। अत्यन्तरूक्षे स्नेहशून्ये च। तथाभूते कङ्गुकोद्रवादिधान्ये पु॰। अतिक्रान्तो रूक्षम्। अतिशयस्निग्धे त्रि॰।

**अतिरूप** पु॰ अतिक्रान्तो रूपम्। रूपवर्ज्जिते परमेश्वरे। "अशब्दमस्पर्शमरूपमव्ययमिति" श्रुत्या तस्य रूपहीनताप्रतिपादनात्तथात्वम्। शुक्लादिरूपहीने वाय्वादौ त्रि॰। अतिशयितं रूपम् प्रा॰ स॰। सुन्दररूपे न॰। "अतिरूपवती कन्या"।

**अतिरेक** पु॰ अति+रिच्-घञ्। अतिशये, भेदे, प्राधान्ये, आधिक्ये च। "संपूर्णमेतयोर्न्नैयमतिरेके परेऽहनीति" तिथित॰। [प्रा॰ ब॰। अत्यन्तरोगयुक्ते त्रि॰।

**अतिरोग** पु॰ अतिशयितो रोगः प्रा॰ स॰। क्षयरोगे

**अतिरोधान** न॰ न तिरोधानम्। प्रकाशे, व्यवधानाभावे च।

**अतिरोमश** पु॰ अतिशयितं रोम अतिरोमन्+अस्त्यर्थे श। वनजाते छागे, वृहद्वानरे च। अत्यन्तरोमाढ्ये त्रि॰।

**अतिरोहित** त्रि॰ न तिरोहितः। प्रकाशिते स्फुटेऽर्थे "अतिरोहितार्थमन्यदिति" प्रमिता॰। अव्यवहिते च।